संस्कृत-वार्ता:

दिनाङ्क :**-20.07.2024**

प्रात: **- 06:55**

माइक्रोसॉफ्ट-व्यवधानम्

माइक्रोसॉफ्ट-सॉफ्टवेयर इत्यस्मिन् तन्त्रांशे विकृतिकारणात् विश्वस्मिन्नपि विश्वे लक्षाधिका: जना: प्रभाविता: समभवन्। अनेन कारणेन उद्योगकार्येषु, बैंकिंगसेवासु अपि च अन्ताराष्ट्रिय-विमानसेवासु च बाधा: समुत्पन्ना:। भारते इंडिगो, अकासा-स्पाइसजेट-इत्येतेषां कार्याणि अशेषे हि देशे प्रभावितानि। इयं समस्या वस्तुत: अमेरिकास्थे साइबर-सुरक्षा-प्रदाता 'क्राउडस्ट्राइक' इत्यनेन सम्बन्धितास्ति। केन्द्रीयमन्त्रिणा अश्विनीवैष्णवेन निगदितं यत् समस्याया: अभिज्ञानम् अन्वेषितम्। समाधानाय च नवीकरणमपि सञ्जातम्। तेनोक्तं यत् राष्ट्रिय-सूचना-केन्द्रस्य अन्तर्जालं नैव प्रभाविजातम्।

बांग्लादेश-विरोध:

बांग्लादेशे आरक्षणसम्बद्ध-विरोधप्रदर्शने मृतकानां संख्या समेध्य एकोनचत्वारिंशत् यावत् समभवत्। वार्ताहरानुसारि प्राशासनिक-वृत्यवसरेषु आरक्षणप्रणाल्यां परिष्करणपरां अभियाचनामालक्ष्य छात्रै: विरोधप्रदर्शनं समाचरितमासीत्। अत्रान्तरे ढाकास्थितेन भारतीयोच्चायोगेन भारतीयनागरिका: गृहे एव अवस्थातुं परामृष्टा:। विदेश-मन्त्रालयेन सामाजिकान्तर्जालिक-सन्देशमाध्यमेन बांग्लादेशे स्थिता: भारतीयनागरिका: भारतीय-उच्चायोगस्य निर्देशा: अनुकर्तुं संप्रार्थिता:।

राष्ट्रपति पुरस्कारा:

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: ह्य: सशस्त्र-बलानां भारतीयतटरक्षकबलानां सेवारतेभ्य: सेवानिवृत्त-कर्मिभ्यश्च चतुर्णवति: विशिष्टसेवापुरस्कारं प्रदत्तवती। अनया एकत्रिंशत् परमविशिष्टसेवापदकानि चत्वारि उत्तमयुद्धसेवापदकानि सप्तपञ्चाशत् अतिविशिष्टसेवापदकानि प्रदत्तानि। राष्ट्रपतिना राष्ट्रपतिभवने रक्षालङ्करणसमारोहस्य द्वितीये चरणे एते पुरस्कारा: प्रदत्ता:। समारोहेऽस्मिन् उपराष्ट्रपति: जगदीपधनखड: रक्षामन्त्री राजनाथसिंह: विदेशमन्त्री डॉ. एस्. जयशङ्कर: दिल्ल्या: च उपराज्यपाल: विनयकुमारसक्सेना उपस्थिता: आसन्।

उपराष्ट्रपति:-जलवायुपरिवर्तनम्

उपराष्ट्रपति: जगदीपधनखड़: उक्तवान् यत् जलवायुपरिवर्तनम् एका वैश्विकापत्समस्या वर्तते। असौ प्रोक्तवान् यत् परिवर्तनमिदं निर्धनेभ्य: जैवविविधताभ्य: खाद्यसुरक्षाभ्यश्च सङ्कटमस्ति। उपराष्ट्रपति: ह्य: नवदिल्ल्यां पीएचडी-चैम्बरऑफ-कॉमर्सएण्डइण्डस्ट्री इत्यस्य जैवोर्जा-विकसितभारतं प्रति मार्ग: इत्यस्मिन् विषये चतुर्थस्य अन्ताराष्ट्रिय-जलवायुशिखरसम्मेलनस्य समापनसत्रं सम्बोधितवान्।

संसत्- विधेयक:

सर्वकारेण आगामिसप्ताहात् समारप्स्यमाने संसद: प्रावृट्सत्रे आपत्प्रबन्धविधौ संशोधनेन सह षड्-नूतनविधेयका: प्रस्तोष्यन्ते। वित्तविधेयकमतिरिच्य सर्वकारेण नागरिकोड्डयनक्षेत्रे व्यापारे सौकर्य्यार्थं भारतीय-वायुयान-विधेयक: चतुर्विंशत्यधिक-द्विसहस्रतम: सूचीबद्धो कृत:। संसद: प्रावृट्सत्रं जुलाईमासस्य द्वाविंशति-दिनाङ्कादारभ्य अगस्तमासस्य द्वादश-दिनांकं यावत् प्रचलिष्यति। वित्तमन्त्री निर्मला-सीतारामन् इत्येषा जुलाईमासस्य त्रयोविंशति-दिनांके केन्द्रीय-आयव्ययकं प्रकाशयिष्यति।

प्रधानमंत्री/ मनकीबात

प्रधानमन्त्रिणा नरेन्द्रमोदिना मन की बात इत्यस्य कार्यक्रमस्य आगामिन: संस्करणस्य कृते प्राप्तान् संदेशान् प्रति प्रसन्नता प्रकटिता। अस्य कार्यक्रमस्य प्रसारणम् अस्मिन् मासे अष्टाविंशति: दिनाङ्के भविष्यति। ह्य: एकस्मिन् सामाजिकान्तर्जालपटलीय संदेश-माध्यमेन श्रीमोदी अवदत् यत्, आगामि-मनकी-बात-कार्यक्रमाय अनेका: संदेशा: आगता:। प्रधानमन्त्रिणा उक्तं यत्, विशेषतः युवानः समाजे परिवर्तनमालक्ष्य ऐक्यप्रयत्नान् प्रकाशयन्ति इति दृष्ट्वा सः प्रसन्नतामनुभवति।

क्रिकेट

महिलानां विंशति: प्रति विंशति एशियाचषक-क्रिकेट्प्रतिस्पर्धायां गतविजेत्रा भारतीयदलेन श्रीलङ्काया: दाम्बुलानगरे सामूहिकचरणस्य प्रारम्भे द्वन्द्वे पकिस्तानदलं सप्तक्रीडकै: पराजितम्।

।।इति वार्ता:।।